केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
( प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः, भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः )

# व्यावसायिकविकासः

## कार्यशालायाः षष्ठं दिनम् (27-11-2023)

## शोधच्छात्राः SWOC इत्येतेषु ध्यानं निक्षिपन्तु




दक्षतायाः अभावे व्यावसायिकविकासः न जायते। शिक्षकः नाम सुगमकर्ता। छात्रैः सह अन्तःक्रिया प्रधाना। सः शिक्षकः श्लाघ्यः यः उत्तमः सम्प्रेषकः वर्तते। शिक्षकस्य व्यावसायिकगुणाः छात्रेषु सङ्क्रमन्ते। अतः शिक्षकः दक्षः भवेत् एव। Reflective Teacher इतीदं पुस्तकं पठनीयम्।

आचार्यात् पादमाधत्ते पादं शिष्यः स्वमेधया ।
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ॥

इत्युक्त्यनुगुणं शिक्षकः स्वीयां भूमिकां निर्वहेत्। आत्मनः Strengths, Weaknesses, Opportunities, and Challenges - SWOC इत्येतेषु विषयेषु शोधार्थिनः ध्यानं केन्द्रीकुर्युः।




**आचार्या रचना वर्मा मोहन**

शिक्षाशास्त्रविद्याशाखा

LBS-NSU , नवदेहली




# सोत्साहानां नास्त्यसाध्यम्



विद्याञ्जलिः इत्येतत् अभियानं देहल्यां सफलं जातम् अस्ति। सेवाकालिकसेवापूर्वकप्रशिक्षणकार्यक्रमेषु महत् साफल्यं प्राप्तं वर्तते। देहल्यां विद्यमानाः संस्कृतविश्वविद्यालयानां आचार्याः वरिष्ठाः शोधच्छात्राः च अवश्यमेव सहयोगं यच्छन्तु। भवतां सहयोगेन देहलीस्थाः संस्कृतशिक्षकाः प्रशिक्षिताः लाभान्विताः च भवन्तु। केन्द्रीयसंस्कृतविश्वविद्यालयस्य Lucknow परिसरस्य छात्रचरा अहम् । LBS- NSU मध्ये अपि मया अधीतम् ।मम मातृसंस्थायाः शिक्षकान् शोधच्छात्रान् च दृष्ट्वा आनन्दम् अनुभवामि।

कार्यशाला एषा सार्थका वर्तते ।




**डा.मनीषा तनेजा**

State Council of Educational Research and Training (SCERT)

Government of NCT of Delhi

# नवाचारः नूनम् अपेक्षितः



Knowledge Organisation public Good इत्येते व्यावसायिकक्षेत्रस्य मानदण्डाः सन्ति। ज्योतिषे वास्तु शास्त्रे कर्मकाण्डे अन्येषु विषयेषु च यदि वृत्तिलाभः भवेत् तर्हि पूर्वोक्ताः मानदण्डाः प्राथम्यं भजन्ते। प्रवासोद्यमे योगस्य विभिन्नेषु विषयेषु च ( YouTube Channel) यथेष्टम् अवसराः सन्ति। लिपिकारः - चित्रकारः - अभिनवकोषकारः - मणिकारः - द्विभाषी - बहुभाषी - भाषाविज्ञानी - सम्प्रेषकः इत्येवं भवितुं विविधावसराः सन्ति। कर्मकाण्डे - संस्कारज्ञः, आगमज्ञः , अर्चकः , याज्ञिकः इत्येवं भवितुं नैके अवसराः सन्ति। परन्तु संस्कृतक्षेत्रे एतादृशस्य एकस्य सङ्घस्य आवश्यकता वर्तते यत्र पारम्परिकव्यावसायिकनिपुणैः सह ग्राहकाः सुखेन आदानं प्रदानं च कर्तुं शक्नुयुः।


आचार्या मीनाक्षी मिश्र

शिक्षाशास्त्रविद्याशाखा

LBS-NSU , नवदेहली

# प्रातिभासिकं व्याख्यानम्

## व्यवसायात्मिका बुद्धिः



व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन इति गीतोपदेशः। व्यवसायशब्दः बहुत्र बहुषु अर्थेषु प्रयुज्यते। परं निश्चयः एकत्र स्यात्। दृष्टिः दृढा स्यात्। शोधार्थं तादृशः विषयः चेतव्यः यः आजीवनं कार्यं कर्तुं अनुकूलकरः पूरकश्च स्यात्। केवलम् उपाधिलाभार्थमेव विषयस्य निश्चयः न कर्तव्यः। शास्त्रीयता वैज्ञानिकता इत्यनर्थान्तरम् । अतः विकासः उभयथा सम्भवति। व्यावसायिकविकासस्य स्रोतः आन्तरिकम् अस्ति। विकासः उभयथा भवेत्। न तु एकमुखः। प्रविधेः प्रयोगः शिक्षायां शोधे च समन्वितरूपेण भवेत्। योजनाबद्धस्य शोधस्य आवश्यकता वर्तते। दत्तांशसङ्ग्रहणस्य विश्लेषणस्य च मध्ये योजनाबद्धता अनिवार्या।

**आचार्यः नीलाभ तिवारी**

संयोजकः , शोधकेन्द्रम्

केन्द्रीयसंस्कृतविश्वविद्यालयः

भोपाल परिसरः , मध्यप्रदेशः

# अन्तःशास्त्रीयं शोधकार्यं कृत्वा कीर्तिभाजः भवन्तु




श्रुतिप्रधानं मीमांसाशास्त्रद्वयम् । धर्मप्रधानं दर्शनमिदम्। एवं कर्तव्यम् इति सूचकस्य इतिकर्तव्यता इत्येतस्य प्रचुरमात्रेण प्रयोगः अस्मिन् शास्त्रे विशेषतः क्रियते। न्यायभूयिष्ठमपि शास्त्रम् इदमेव । सहस्रं न्यायाः अधिकरणेषु विकीर्णाः सन्ति। वेदेषु विहितानां वैज्ञानिकतत्त्वानां गवेषणं करणीयम् ।

मीमांसाशास्त्रोक्तानां न्यायानां सामाजिकोपयोगिता वर्तते इति कथनमात्रेण प्रयोजनं नास्ति। न्यायमीमांसा कार्या। गवेषणा विधेया। औत्सुक्यमपि भवेत्। भाट्टप्राभाकारमतयोः तौलनिकमध्ययनं इतोऽपि कर्तुं शक्यते। मतद्वयालम्बिनां व्याख्याकाराणां विषये अपि शोधः कर्तव्यः। मतद्वये प्राभाकारमतमधिकृत्य अध्ययनाध्यापनपरम्परा अधुना नैव दृश्यते। तन्त्ररहस्यं श्रूयते न तु दृश्यते। अधिकरणन्याययोः सम्बन्धः विश्लेषणीयः। शास्त्रान्तरेषु मीमांसान्यायसञ्चारम् अधिकृत्य अपि शोधकार्यं संस्कृतक्षेत्रे अत्यल्पमात्रेण जातम्। अतः आधुनिकैः एतेषु विषयेषु शोधकार्यं करणीयम्। न्यायालयेषु मीमांसान्यायाः बहुधा प्रयुज्यन्ते। कुत्र कुत्र ? कदा कदा ? अद्यावधि न्यायालयेषु प्रयुक्ताः इत्यपि अनुसन्धेयम् ।

**मीमांसान्यायाः ग्रन्थाः वैज्ञानिकतत्त्वानि च पार्थक्येन शोधार्थिनः स्वीकर्तुं प्रभवन्ति। साहित्यव्याकरणादिषु प्रचुरमात्रेण शोधकार्यं कुर्वाणाः अन्तःशास्त्रीयं शोधकार्यं कृत्वा कीर्तिभाजः भवन्तु।**


**आचार्यः सूर्यनारायणभट्टः**

संयोजकः, शोधकेन्द्रम्, केन्द्रीयसंस्कृतविश्वविद्यालयः

राजीवगान्धीपरिसरः, श्रृङ्गेरी



**Guidance and support –**

**Prof. Shrinivasa Varakhedi**

Honourable Vice Chancellor of CSU, Delhi

**Prof. R. G. Murali Krishna**

Registrar I/c, CSU, Delhi

**Prof. Madhukeshwar Bhat**

OSD to Hon'ble Vice-Chancellor, CSU, Delhi

**Coordinator –**

**Dr. Ganesh T. Pandit**

Deputy Director (Publications)

CSU, Delhi